B I (Three Year H)
Under 1+1+1 System

# 2018

## SANSKRIT (Honours)

FIRST PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

*The figures in the margin indicate full marks.*

1. ''अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः।''

उक्तिरियं केनोक्ता? 'किरातार्जुनीयम्' महाकाव्यस्य प्रथम-सर्गमवलम्ब्य वक्तुश्चारित्रिकं वैशिष्ट्यं राजनीतिज्ञानं च सरलसंस्कृतभाषया आलोच्यताम्। 12

अथवा

''भारवेर्भा रवेरिव'' इति वचनस्य सोदाहरणं याथार्थ्यं प्रतिपाद्यताम्।

2. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (एकस्य)— 5

(क) गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्
मनोरमामात्मवधूमिव श्रियम्॥

(ख) सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्॥

अथवा

संक्षिप्तोत्तरं प्रदेयम् (द्वयस्य)— 2½×2=5

(क) कः केन किमर्थं चररूपेण नियुक्तः?

(ख) "न वाधतेऽस्य त्रिगणः परस्परम्" अत्र 'अस्य' पदेन कः उक्तः? 'त्रिगणः' पदस्य कोऽर्थः?

(ग) कः वृकोदरः? सः इत्थं कथमुच्यते?

3. संस्कृतभाषया देवनागरीलिप्यां व्याख्या कार्या (एकस्य)— 8

(क) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥

(ख) पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः॥

4. (क) अधोलिखितेषु व्याकरणपारिभाषिकशब्देषु कस्यचिद् द्वयस्य ससूत्रं संज्ञानिर्णयं कुरुत— 3×2=6

सवर्णः ; निपातः ; टि ; पदम्।





(ख) निम्नलिखितेषु प्रत्याहारेषु के वर्णाः, निर्णीयताम् (चतुर्णाम्)— 1×4=4

अच् ; एङ् ; वल् ; खय् ; जश् ; झर्।

(ग) सूत्रद्वयस्य व्याख्या कार्या— 3×2=6

आदिरन्त्येन सहेता ; अमि पूर्वः ; एचोऽयवायावः ; ष्टुना ष्टुः।

(घ) वाच्यपरिवर्तनं कुरुत (चतुर्णाम्)— 2×4=8

*(i)* छात्राः पुस्तकानि पठन्ति। (कर्मवाच्ये)

*(ii)* अहं युवां पश्यामि। (कर्मवाच्ये)

*(iii)* गोपः गां दुग्धं दोग्धि। (कर्मवाच्ये)

*(iv)* स मृतः। (भाववाच्ये)

*(v)* चन्द्रं निरीक्ष्य शिशुः हसति। (कर्मवाच्ये)

*(vi)* मया इदं कर्तव्यम्। (कर्तृवाच्ये)

(ङ) ससूत्रं पदसाधनं कुरुत (द्वयस्य)— 4×2=8

नरात् ; रामेण ; फलम् ; रमया।

(च) ससूत्रं पदसाधनं कुरुत (द्वयस्य)— 4×2=8

पठन्ति ; सेवते ; अपठन् ; सेवसे।

5. यौगन्धरायणः कः? 'स्वप्नवासवदत्तम्'-नाटके तस्य भूमिका आलोच्यताम्। 12

अथवा

"स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः"—उक्तेरस्य याथार्थ्यं प्रतिपाद्यताम्।

6. वङ्गभाषया आङ्गलभाषया वा अनुद्यताम् (एकम्)— 5

(क) कस्यार्थः कलसेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥

(ख) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च॥

**अथवा**

प्रश्नद्वयं समाधेयम्— 2½×2=5

(क) रुमण्वान् कः? 'स्वप्नवासवदत्तम्'-नाटके तस्य का भूमिका?

(ख) "तस्यां मे महती स्वता"—उक्तेरस्य कः वक्ता? 'तस्याम्'-पदेन किं बोध्यव्यम्? वक्तुः अस्य अनुभवस्य किं कारणम्?

(ग) वसन्तकः कः? उदयनेन सह तस्य संपर्कं कीदृशम्?

7. संस्कृतभाषया देवनागरीलिप्या एकस्य व्याख्या कार्या— 8

(क) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥

(ख) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥





8. संस्कृतभाषया देवनागरीलिप्यां अनुवादं कुरुत (द्वयस्य)— 5×2=10

*(a)* The sun having set in the west, the birds are returning to their nests on large trees for rest at night.

*(b)* Man is the maker of his own fate. We cannot prosper in life if we are afraid of labour. Some people think that success depends on luck but that is not true.

*(c)* Sister Nivedita came from a distant land and dedicated herself to the service of mother India.

★★★

B I (Three Year H)
Under 1+1+1 System

**2018**

# SANSKRIT (Honours)

SECOND PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

*The figures in the margin indicate full marks.*

## विभाग—क

1. 'कादम्बरी' कथा आख्यायिका वा सम्यक्रूपेण आलोच्यताम्। 12

**अथवा**

चण्डालकन्यायाः चरित्रचित्रणं कादम्बरी-कथामुखमाश्रित्य आलोचयत।

2. अधोलिखितयोः कस्यचिदेकस्य मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः — 5

(क) नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम्। अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्र-संपर्ककलङ्कमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः।

(ख) इत्युक्तवति भूभुजि कुमारपालितः किञ्चित् स्मितवदनो नृपमवदत्—देव! किमत्र चित्रम्। एते हि शुकसारिका-प्रभृतयो विहङ्गविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन।

3. देवनागरीलिप्यां सन्धिविच्छेदं कृत्वा पुनः लिखत— 3

ते च तस्मिन् वनस्पतावतिवाह्यातिवाह्य रजनीमात्मनीडेषु प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयो मदकल-हलधर-हलमुखोत्क्षेप-विकीर्ण-बहुस्रोत-समस्वरतले कालिन्दकन्यामिव दर्शयन्तः।

## विभाग—ख

4. हंसपदिकायाः संगीतस्य नाटकीय तात्पर्यम् उल्लेखम्। 12

अथवा

"कालिदासः प्रकृतेः कविः" इत्यस्य वाक्यस्य तात्पर्यं सविमर्शमालोचयत।

5. कमपि एकस्य संस्कृतभाषया देवनागरीलिप्यां व्याख्यायताम्— 8

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ख) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असंनिवृत्यैर्तदतीतमेते
मनोरथा नाम तटप्रपाताः॥





6. कस्यापि एकस्य पादपूरणं देवनागरीलिप्यां कुरुत— 5

(क) न खलु न खलु वाणः सन्निपात्योऽयस्मिन्
... ... ... ... ... ... ... ... ...।
... ... ... ... ... ... ... ... ...
... ... ... ... ... ... ... ... ...॥

(ख) शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
... ... ... ... ... ... ... ... ...।
... ... ... ... ... ... ... ... ...
... ... ... ... ... ... ... ... ...॥

7. कस्यचिद् द्वयस्य मातृभाषया आङ्गलभाषया वा अनुवादः करणीयः — 5×2=10

(क) अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम्।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतम्॥

(ख) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

(ग) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

**8.** अधोलिखितानां प्रश्नानां कस्यचिद् द्वयस्य संक्षिप्तमोत्तरं लिखत— 2½×2=5

(क) कः आसीत् करभकः? कस्मिन् अङ्के तस्याविर्भावो दृश्यते?

(ख) "चक्रवाकवधु आमन्त्रयस्व सहचरं ननु उपस्थित रजनी" शब्दे केषाम् उल्लेखिताः भवन्ति?

(ग) 'शकुन्तलम्'-नाटके मङ्गलाचरणे ईशस्य कति रूपाणि सन्ति?

## विभाग—ग

**9.** (क) अधोलिखितेषु छन्दःसु द्वयोः उदाहरणसहयोगेन संज्ञानिर्देशं कुरुत— 5×2=10

मन्दाक्रान्ताः ; रुचिरा ; स्रग्धरा ; मालिनी।

(ख) गुरुलघुनिर्देशपूर्वकं संज्ञासहकारेण छन्दो निर्णयं कुरुत (कस्यचिदेकस्य)— 5

*(i)* सा निन्दन्ती स्वानि भाग्यानि वाला।

*(ii)* मुक्तेषु रश्मिषु निरायतपूर्वकायाः।

*(iii)* प्रत्यर्पितन्यास इवान्तरात्मा।

**10.** (क) किं नाम गणः? गङ्गादासस्य कः मतः गणविन्यासप्रसङ्गे? 2½

(ख) छन्दश्शास्त्रानुसारं यतिस्वरूपमालोच्यताम्। 2½





## विभाग—घ

**11.** अधोलिखितानां प्रश्नानां कस्यचिद् द्वयस्य उत्तरं प्रदेयम्— 7½×2=15

(क) का सन्धिः? अस्याः कति भेदाः वर्तन्ते? तेषां नामानि विलिख्य उदाहरणपूर्वकम् आलोचयत।

(ख) को नाम अर्थोपक्षेपकः? कति भेदाः सन्ति? सोदाहरणम् आलोच्यन्ताम्।

(ग) का तावत् प्रस्तावना? सोदाहरणं तस्याः भेदान् आलोचयत।

**12.** अधोलिखितेषु कस्यचित् एकस्य टिप्पणी कार्या— 5

रूपकम् ; अर्थप्रकृतिः ; भारतीवृत्तिः।

★★★

B II (Three Year H)
Under 1+1+1 System

**2018**

## SANSKRIT (Honours)

THIRD PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

***The figures in the margin indicate full marks.***

क—विभागः

1. प्रश्नद्वयं समाधेयम्— 12×2=24

(क) कति वेदाङ्गानि? तेषां स्वरूपं प्रयोजनश्च विशदीक्रियताम्।

(ख) वैदिकदेवतातत्त्वविषये प्रबन्धः लेखनीयः।

(ग) वैदिकयुगे 'नारीणामवस्थानम्' इति विषयमाधारीकृत्य प्रबन्धमेकं रचयत।

(घ) ऋग्वेदस्य धर्मनिरपेक्ष-सूक्तानां वैशिष्ट्यं किम्? सोदाहरणं पर्यालोचयत।

2. कस्यापि एकस्य टिप्पणी कार्या— 6

शौनकः ; आरण्यकम् ; केनोपनिषद् ; अथर्ववेदः।

अथवा

संक्षिप्तोत्तरं लेखनीयम् (त्रयाणाम्)— 2×3=6

(क) ऋग्वेदस्य संवादसूक्तस्य नामद्वयं लिखत।

(ख) वेदपाठस्य कति भेदाः? तेषां नामानि लिखत।

(ग) को नाम 'संहितोपनिषद्'? कति मन्त्राः तत्र सन्ति?

(घ) किं तावत् 'वंशमण्डलम्'।

(ङ) ऋग्वेदस्य उपनिषदां नामानि लिखत।

(च) यजुर्वेदस्य भेदान् लिखत।

ख—विभागः

3. प्रश्नद्वयं समाधेयम् (कस्याप्येकस्य उत्तरं संस्कृतभाषया लेखनीयम्)— 12×2=24

(क) किं तावत् गीतिकाव्यम्? संस्कृतसाहित्ये कतिविधं गीतिकाव्यम्? कमप्येकमाधारीकृत्य प्रबन्धमेकं रचयत।

(ख) संस्कृतभाषाया विरचितानां चम्पूकाव्यानां विशद-विवरणमुपस्थाप्यताम्।

(ग) किं नाम पुराणम्? पुराणसाहित्यस्य वैशिष्ट्यमुल्लिख्य गुरुत्वं च आलोच्यताम्।

(घ) भवभूतिविरचितानां नाटकानां संक्षिप्तपरिचयो देयः।





4. टिप्पणी कार्या (एकस्य)— 5

बुद्धचरितम् ; हितोपदेशः ; राजतरङ्गिणी ; बाणभट्टः ; रघुवंशम्।

5. अतिसंक्षिप्तोत्तरं लेखनीयम् (त्रयाणाम्)— 2×3=6

(क) महाभारतस्य पर्वनां संख्यामुल्लिख्य तेषु पञ्चनामानि लेखनीयानि।

(ख) किं तावत् द्विसन्धानकाव्यम्?

(ग) भट्टिकाव्ये कति काण्डाः सन्ति? तेषां नामानि लिखत।

(घ) 'शिशुपालवधं' कः रचितवान्? तत्र कति सर्गाः विद्यन्ते?

(ङ) रामायणवलम्ब्य संस्कृतेन विरचितस्य नाटकद्वयस्य नाट्यकारस्य च नाम लेखनीयम्।

ग—विभागः

6. एकः प्रश्नः समाधेयः — 10

(क) प्राचीनभारतस्य छन्दःशास्त्रमधिकृत्य नातिदीर्घः प्रबन्धः लेखनीयः।

(ख) प्राचीनयुगे मध्ययुगे च आयुर्वेदशास्त्रस्य स्थितिः कीदृश्यासीत्, सम्यक् आलोचयत।

7. टिप्पणी कार्या (कस्यचिदेकस्य)— 5

ब्रह्मगुप्तः ; पञ्चसिद्धान्तिका ; वृत्तरत्नाकरः।

घ—विभागः

8. एकः प्रश्नः समाधेयः — 12

(क) अर्वाचीनकाले विरचितानाम् ऐतिहासिकनाटकानां संक्षिप्तः परिचयः देयः।

(ख) ऊनविंशशतके पश्चिमवङ्गेषु विरचितानां काव्यनाटकादीनां विवरणमुपस्थाप्यताम्।

9. टिप्पणी कार्या (द्वयोः)— 4×2=8

(क) शैवली

(ख) स्वातन्त्र्य-सन्धिक्षणम्

(ग) निवेदित-निवेदितम्

(घ) विवाह-विडम्बनम्

(ङ) ननाविताडनम्

★★★

B II (Three Year H)
Under 1+1+1 System

# 2018

## SANSKRIT (Honours)

FOURTH PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

*The figures in the margin indicate full marks.*

### एकक—1

1. संस्कृतभाषया एकस्योत्तरं प्रदेयम्— 12

(क) कस्तावद् संस्कारः? मनुमतानुसारेण द्विजातीनां संस्कारविषये आलोच्यताम्।

(ख) को नाम सदाचारः? सदाचारः कस्मात् देशात् शिक्षणीयः? मनुमतानुसारेण ब्राह्मणानाम् आश्रितव्यः धर्मानुष्ठानयोग्यः देशविषये आलोच्यताम्।

2. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या— 8

(क) न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

(ख) संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः।
व्रता नियमधर्माश्च सर्वे संकल्पजाः स्मृताः॥

3. द्वयोः उत्तरं प्रदेयम्— 2½×2=5

(क) मनुमतानुसारेण धर्मः कः?

(ख) कस्तावद् ब्रह्माञ्जलिः?

(ग) कस्मात् आचारः शिक्षणीयः?

(घ) के तावदनध्याययोग्याः?

एकक—2

4. एकस्योत्तरं प्रदेयम्— 10

(क) किं नाम ऋणादानम्? याज्ञवल्क्यमतानुसारेण ऋणादानम् आलोच्यताम्।

(ख) कति प्रमाणानि याज्ञवल्क्येन स्वीकृतानि? तानि सविशदम् आलोच्यन्ताम्।

5. अधोलिखितेषु द्वयोः टिप्पणी कार्या— 4½×2=9

आधिः ; क्रीतानुशयः ; प्राड्विवाकः ; साहसः।

6. अधोलिखितेषु द्वयोः संक्षिप्तमुत्तरं प्रदेयम्— 3×2=6

(क) को नाम व्यवहारः?

(ख) अस्वामिविक्रयः कः?

(ग) दायः कः?

(घ) कस्तावद् स्तेयः?





एकक—3

7. एकस्योत्तरं प्रदेयम्— 12

(क) अमात्योत्पत्तिविषये कौटिल्यस्य मतं सवितर्कम् आलोच्यताम्।

(ख) कथं मन्त्रः पञ्चाङ्ग उच्यते? कौटिल्यमतानुसारेण मन्त्रज्ञानस्य मन्त्ररक्षणस्य च विषयम् आलोच्यताम्।

8. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः)— 4×2=8

(क) प्रदीपः सर्वाविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(ख) कृषिपाशुपाल्ये वाणिज्या च वार्ता, धान्यपशुहिरण्यकुप्य-विष्टिप्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।

(ग) तस्मादरिषड्वर्गत्यागेन इन्द्रियजयं कुर्वीत। वृद्धसंयोगेन प्रज्ञाम्, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनम्, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम्।

9. द्वयोः टिप्पणी लेखनीया— 2½×2=5

लुब्धवर्गः ; उपसर्पः ; वार्ता ; उपायः।

एकक—4

10. अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या— 5×2=10

अचो यत् ; कालसमयवेलासु तुमुन् ; इगुपधज्ञाप्रीकिरः कः ; समानकर्तृकयोः पूर्वकाले ; गर्गादिभ्यो यञ्।

**11.** प्रतिविभागादेकैकमादाय साकल्येन त्रयाणां पदसाधनं क्रियताम्— 3×3=9

**क—विभागः**

दानीयः ; धनदः ; एधितव्यम्।

**ख—विभागः**

दौहित्रः; कानीनः; मीमांसकः।

**ग—विभागः**

गौरी; मत्सी; युवती।

**12.** प्रतिविभागाद् एकैकं समादाय साकल्येन त्रयाणां परिणतरूपं लिख्यताम्— 2×3=6

**क—विभागः**

कृ + ण्वुल् ; स्तु + क्यप् ; छिद् + क्त।

**ख—विभागः**

गर्ग + यञ् ; गङ्गा + अण् ; वायु + यत्।

**ग—विभागः**

त्रिफल + टाप् ; रात्रि + ङीप् ; नट + ङीष्।

**अथवा**

अधस्तनेषु प्रश्नेषु एकस्य उत्तरं प्रदेयम्— 6

(क) लघुसिद्धान्तकौमुद्यनुसारं स्त्रीप्रत्ययानां प्रयोगविषये टिप्पणी लिख्यताम्।

(ख) व्याख्या कार्या—

भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

★★★

6. प्रश्नत्रयं समाधेयम्— 2×3=6

(क) काकुत्स्थः कः?

(ख) भट्टिकाव्यस्य नामान्तरं किम्?

(ग) मल्लीनाथ-कृतायाः भट्टिकाव्यस्य टीकायाः नाम किम्?

(घ) गाधेयः कः?

(ङ) भट्टिकाव्ये कति काण्डाः सन्ति? तेषां नामानि लिखितव्यानि।

विभागः —घ

7. प्रश्नद्वयं समाधेयम्— 10×2=20

(क) ध्वनिवादस्य प्रवक्ता कः? तस्य ग्रन्थनाम किम्? संस्कृत-अलंकारशास्त्रानुसारं ध्वनितत्त्वविषये विशदमालोच्यताम्।

(ख) वक्रोक्तिजीवितः केन विरचितः? संस्कृत-अलंकारशास्त्रे तस्य भूमिका आलोच्यताम्।

(ग) संस्कृत-अलंकारशास्त्रे वामनस्य अवदानम् आलोच्यताम्।

(घ) टिप्पणी लेखनीया (द्वयोः)— 5×2=10

मम्मटः ; विश्वनाथः ; काव्यमीमांसा ; दशरूपकम्।

★★★



B III (Three Year H)
Under 1+1+1 System

**2018**

## SANSKRIT (Honours)

FIFTH PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

*The figures in the margin indicate full marks.*

विभागः —क

1. प्रश्नद्वयं समाधेयम् (एकस्योत्तरं संस्कृतभाषया प्रदेयम्)— 10×2=20

(क) दण्डीमतानुसारेण काव्यकारणमालोच्यताम्।

(ख) कति गुणाः दण्डिना स्वीकृताः? तेषां नामानि लेखितव्यानि। तेषां यथेच्छं त्रयमालोच्यताम्।

(ग) कथा-आख्यायिकयोः भेदमालोच्यताम्।

(घ) व्याख्येयम् (द्वयोः)— 5×2=10

*(i)* कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्यास्य प्रकल्पते॥



( *Turn Over* )

*(ii)* गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥

*(iii)* गुणदोषानशास्त्रज्ञः कथं विभजते जनः।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु॥

विभागः —ख

**2.** प्रश्नत्रयं समाधेयम्— 10×3=30

(क) सलक्षणं सोदाहरणं च आलोच्यताम् (द्वयोः)— 5×2=10

यमक ; व्यतिरेक ; उत्प्रेक्षा ; निदर्शना ; सन्देह।

(ख) प्रभेदः निर्णेयः (द्वयोः)— 5×2=10

*(i)* रूपक-परिणामयोः

*(ii)* समासोक्ति-अप्रस्तुतप्रशंसयोः

*(iii)* दृष्टान्तः-प्रतिवस्तूपमयोः

*(iv)* विशेषोक्ति-विभावनयोः

(ग) एकमलंकारमवलम्ब्य संक्षिप्तः प्रबन्धः लिख्यताम्— 10

श्लेष ; अतिशयोक्ति ; अनुप्रास।

(घ) श्लोकार्थमालोच्य अलंकारः निर्णीयताम् (द्वयोः)— 5×2=10

*(i)* वारिजेनेव सरसी शशिनेव निशीथिनी।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा॥

*(ii)* प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः॥





*(iii)* क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्ति यातं तु॥

*(iv)* सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥

विभागः —ग

**3.** एकस्योत्तरं प्रदेयम्— 12

(क) भट्टिकाव्यस्य द्वितीयसर्गानुसारं रामचन्द्रेन मारीचवधवृत्तान्त-मालोच्यताम्।

(ख) कथं भट्टिकाव्यम् उदाहरणकाव्यमित्युच्यते? आलोच्यताम्।

**4.** संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या (एकस्य)— 8

(क) न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥

(ख) बलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तदुःस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य॥

**5.** मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः (एकस्य)— 4

(क) सितारविन्दप्रचयेषु लीनाः संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

(ख) हिरण्मयी साललतेव जङ्गमा च्युता दिवः स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली॥

B III (Three Year H)
Under 1+1+1 System

**2018**

**SANSKRIT (Honours)**

SIXTH PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

*The figures in the margin indicate full marks.*

क—विभागः

1. व्याख्या कार्या (चतुर्णाम्)— 5×4=20

(क) ज्ञानाधिकरणमात्मा।

(ख) तद्वति तत्प्रकारकोऽनुभवो यथार्थः।

(ग) अनादिः सान्तः प्रागभावः।

(घ) आप्तवाक्यं शब्दः।

(ङ) उष्णस्पर्शवत्तेजः।

(च) आकाङ्क्षादिरहितं वाक्यमप्रमाणम्।

**2.** प्रश्नद्वयं समाधेयम्— 12×2=24

(क) अन्नंभट्टकृतं विशेषलक्षणं प्रतिपद्व्यावृत्तिपुरःसरमालोच्यताम्। विशेषः कथं स्वीक्रियते? विशेषः कुत्रास्ति? विशेषे विशेषं स्वीक्रियते वा न वा, सयुक्तिकमालोच्यताम्। 4+3+2+3=12

(ख) समवायः कतमः पदार्थः? अन्नंभट्टकृतं समवायलक्षणं प्रतिपद्व्यावृत्तिपूर्वकमालोच्यताम्। समवायः कुत्र कुत्र अस्ति? संयोग-समवायोः वैसादृश्यम् आलोच्यताम्। 2+4+2+4=12

(ग) किं नाम कारणम्? कारणस्य भेदान् उल्लिख्य यथेच्छम् एकं वर्णयत। 2+2+8=12

**3.** वैधतां निरूपयत (द्वयोः)— 3×2=6

(क) पर्वतो वह्निमान् प्रमेयत्वात्।

(ख) गगनारविन्दं सुरभि अरविन्दत्वात्।

(ग) वह्निरनुष्णो द्रव्यत्वात्।

(घ) जीवनं नित्यं जन्यत्वात्।

**4.** पञ्चानां संक्षिप्तोत्तरं प्रदेयम्— 2×5=10

(क) तर्कसंग्रहानुसारेण कर्मणां नामानि लिखत।

(ख) अन्नंभट्टेन पृथिव्याः किं लक्षणं कृतम्?

(ग) तर्कसंग्रहानुसारेण हेत्वाभासाः कतिविधाः? के च ते?





(घ) तर्कसंग्रहानुसारेण वाक्यार्थज्ञाने को हेतुः?

(ङ) तर्कसंग्रहे तर्कशब्दस्य कोऽर्थः?

(च) तर्कसंग्रहे सन्निकर्षाः कतिविधाः?

(छ) को नाम प्रध्वंसाभावः? उदाहरणं देयम्।

(ज) तर्कसंग्रहानुसारं गुणाः कतिविधाः? यथाक्रमं पञ्चानां नामानि लिखत।

## ख—विभागः

**5.** द्वयोः प्रश्नयोः उत्तरं कार्यम्— 10×2=20

(क) बौद्धदर्शनस्य कति संप्रदायाः? के च ते? तेषां सविशदमालोच्यताम्।

(ख) को नाम योगः? योगस्य कति अङ्गानि? तेषां सविस्तारमालोच्यताम्।

(ग) भारतीयदर्शनस्य मुख्यसंप्रदायेषु वैशेषिकदर्शनं कस्मिन् संप्रदाये अन्तर्भुक्तो भवति? 'वैशेषिक' इति संज्ञायाः किं कारणम्? तेषां मतानुसारेण परमाणुकारणवादः आलोच्यताम्।

(घ) मीमांसासम्मतः प्रामाण्यवादः ख्यातिवादश्च आलोच्यताम्।

**6.** द्वयोः प्रश्नयोः उत्तरं संस्कृतभाषया लेखनीयम्— 5×2=10

अनेकान्तवादः ; सत्कार्यवादः ; आरम्भवादः ; आत्मन्।

## ग—विभागः

7. पञ्चप्रश्नाः समाधेयाः — 2×5=10

(क) पुँथि-शिलालेखयोर्मध्ये स्वरूपगतं पार्थक्यं निर्दिश्यताम्।

(ख) संस्कृतपाठोद्धारे प्रतिबन्धकानां विशदीक्रियताम्।

(ग) लिपिविज्ञान-पुँथिविद्ययोः पारस्परिकसम्पर्कं लेखनीयम्।

(घ) टिप्पणी कार्या—

गिलगिट् पुँथि

(ङ) पुँथिसंरक्षणविषये कानि नियमानि सन्ति, विशदालोच्यताम्।

(च) पुँथिबन्धनरीतेः तस्य प्रयोजनं च सम्यक् आलोच्यताम्।

(छ) वङ्गदेशे पुँथिचर्चाविषये 'संस्कृतकलेज' इति ग्रन्थागारस्य अवदानम् आलोचयत।

(ज) का नाम पुँथिविद्या?

★★★

B III (Three Year H)
Under 1+1+1 System

**2018**

**SANSKRIT (Honours)**

SEVENTH PAPER

( New Syllabus )

*Time* : 4 hours *Full Marks* : 100

***The figures in the margin indicate full marks.***

क—विभागः

1. हिरण्यगर्भसूक्ते प्रतिफलितं दार्शनिकतत्त्वमालोच्यताम्। 8

अथवा

संज्ञानसूक्तस्य सामाजिकगुरुत्वमालोच्यताम्।

2. संस्कृतेन व्याख्या कार्या (एकस्य)— 6

(क) अ॒ग्निर्होता॑ क॒विक्र॑तुः
स॒त्यश्चि॒त्रश्र॑वस्तमः।
दे॒वो दे॒वेभि॒रा ग॑मत्॥

(ख) अ॒क्षैर्मा दीव्यः कृ॒षिमित् कृ॑षस्व
वि॒त्ते र॑मस्व व॒हु मन्य॑मानः।
तत्र॒ गाव॑ः कितव॒ तत्र॑ जा॒या
तन्मे॒ वि च॑ष्टे सवि॒तायम॒र्यः॥

3. आङ्गलभाषया वङ्गभाषया वा अनुद्यताम् (एकस्य)— 5

(क) य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः।
यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम॥

(ख) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि॥

4. व्याख्या कार्या— 6

अग्निमीले इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्।

अथवा

द्वयोः टीका प्रदेया— 3×2=6

स्विष्टकृत् याग ; आधान ; याज्या ; विनियोग।

ख—विभागः

5. अथर्ववेदीय भूमिसूक्तानुसारेण पृथिव्याः सौन्दर्यमालोच्यताम्। 10

अथवा

द्वयोः अनुवादः करणीयः — 5×2=10

(क) असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैन गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयति नः॥

(ख) या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि॥





(ग) नमस्ते आयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥

ग—विभागः

6. मनुमत्स्यकथा कस्मिन् वेदे अस्ति? अस्याः कथायाः उत्सः गुरुत्वं च आलोच्यताम्। 10

अथवा

शुनःशेपोपाख्यानं कुत्र दृश्यते? उपाख्यानोऽयम् आलोच्यताम्।

7. आङ्गलभाषया वङ्गभाषया वा अनुद्यताम् (द्वयोः)— 5×2=10

(क) पुष्पिण्यौ चरतो जङ्घे, भूष्णुरात्मा फलग्रहिः।
शेरेऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे हतश्चरैवेति॥

(ख) नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम।
पापो नृषद्वरो जन इन्द्र इच्चरतः सखा चरैवेति॥

(ग) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति॥

घ—विभागः

8. उपनिषच्छब्दस्य का व्युत्पत्तिः? बृहदारण्यकोपनिषद् कस्मिन् वेदे अस्ति? औपनिषदिकं मूलतत्त्वमालोच्यताम्। 10

अथवा

बृहदारण्यकोपनिषदनुसृत्यः जीवात्मनः स्वरूपमालोच्यताम्।

★ ★ ★

**9.** संस्कृतभाषया व्याख्या कार्या— 6

(क) यदैतमनुपश्यत्यात्मानं देवमञ्जसा।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते॥

(ख) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

**10.** आङ्गलभाषया वङ्गभाषया वा अनुद्यताम्— 4

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथो मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

अथवा

अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥

**ङ—विभागः**

**11.** (क) पदपाठः प्रदर्श्यताम् [Q. No. **2**(क) **अथवा 3**(क)]. 7

(ख) वैदिकतुमर्थप्रत्ययः **अथवा** लेट् प्रयोगस्य वैशिष्ट्यम् आलोच्यताम्। 12

(ग) द्वयोः व्याकरणिकी व्याख्या कार्या— 3×2=6

*(i)* कविक्रतुः in Q. No. **2**(क)

*(ii)* विधेम in Q. No. **3**(क)

*(iii)* दिवेदिवे in Q. No. **3**(ख)

★★★